**Shikshan Sanshodhan** : Journal of Arts, Humanities and Social Sciences
Monthly, Peer-Reviewed, Refereed, Indexed Journal
Volume - 9, Issue - 3, March - 2026
ISSN(o): 2581-6241
Impact Factor: 9.134

शिक्षण संशोधन

DOIs:10.2018/SS/202603009 --:-- Research Paper / Article / Review

# उपनिषत्सन्दर्भे उत्तररामचरितम्

[1] **Chiranjit Mardi,** [2] **Dr. Asheesh Kumar**
[1]Research Scholar, Discipline of Sanskrit, School of Humanities, IGNOU, New Delhi
[2]Assistant Professor, Discipline of Sanskrit, School of Humanities, IGNOU, New Delhi
Email - [1]chiranjitmardi123@gmail.com, [2] asheeshkr@ignou.ac.in

**शोधसारः** बहुशास्त्राणां ज्ञातृणा भवभूतिना त्रीणि दृश्यकाव्यानि विरचितानि। एतेषु एव दृश्यकाव्येषु तस्य बहुशास्त्रज्ञत्वस्य परिचयः प्राप्यते। एतद्दृश्यकाव्ये पाठे अवगम्यते यत्, भवभूतिः उपनिषद्ग्रन्थान् सम्यगधीतवान् आसीत्। छान्दोग्य-तैत्तिरीय-बृहदारण्यकाद्युपनिषदां तात्त्विकविषयाः प्रसङ्गक्रमेण उत्तररामचरितमिति नाटके समाविष्टाः दृश्यन्ते। काव्यजगतः प्रकाशसदृशः नाट्यकारः अयं भवभूतिः नैकवारम् उपनिषदाधारितविषयान् स्वग्रन्थे उपस्थापितवान्। अस्मिन् नाटके उपनिषद्प्रसङ्गः बहुवारं समागतः। एतन्नाटकस्य चतुर्थाङ्के '**असुर्या नाम ते लोकाः**' इत्येतादृशी पङ्क्तिः प्राप्यते। किञ्चित् परिवर्त्य उपस्थापिता उक्तरियम् ईशावास्योपनिषदुक्तस्य मन्त्रांशस्य पुनरुक्तिवत् भाति। एतन्नाटकस्य द्वितीयाङ्के उपनिषदाधारितविषयाः प्रधानतया अभिव्याक्ताः दृश्यन्ते। अत्र '**उद्गीथविदो वसन्ति**'-इत्यादिप्रयोगेन छान्दोग्योपनिषदः '**ओमि**'ति परब्रह्म स्मर्यते। '**ॐ**' इति त्रिगुणात्मकम् एकारक्षं ब्रह्मैव बोध्यते '**उद्गीथ**' इत्यनेन पदेन। छान्दोग्योपनिषदि एतस्य स्पष्टोल्लेखः प्राप्यते- '**ओमित्येतदक्षरमुद्गीथमुपासीत**' इति। एतस्मिन्नेव अङ्के दृश्यते यत् वाल्मीकेः शब्दब्रह्मज्ञाने प्रकाशे सति उपनिषद्प्रतिपादित-ब्रह्मविद्याविषयकः निर्देशः वाल्मीकये प्रदत्तः- "**शब्दब्रह्मनस्तादृशं विवर्तमितिहासं रामायणं प्रणिनाय**" इति। "**यत्रानन्दाश्च मोदाश्च**" इत्यत्र तैत्तिरीयोपनिषदः प्रभावः अवलोक्यते। अत्र यादृशः सुखः वर्णितः, तैत्तिरीयोपनिषदि अपि "**आनन्दो ब्रह्मेति व्यजानात्**" इत्यादिना वाक्येन तादृशः आनन्दः सुखः वा वर्णितः। तैत्तिरीयोपनिषदुक्तस्य ब्रह्मलोकस्य उल्लेखोऽपि अत्र दृश्यते। एतदतिरिच्य "**शिवास्ते पन्थानो देवयानाः**", "**शाश्वतं पदम्**" इत्यादिभिः शब्दप्रयोगैः उपनिषद्प्रतिपादिताः विषयाः एव प्रकाशिताः भवन्ति।

महाकवि भवभूतिः बहुशास्त्राणां ज्ञाता अस्ति इत्येतद्वक्तव्यं दृढीकरोति शोधपत्रमिदम्। तस्य आध्यात्मिकज्ञानगभीरता प्रतिपादिता अस्ति एतस्मिन् शोधपत्रे। वेद-वेदान्त-दर्शन-उपनिषदादिशास्त्राणां प्रमुखप्रतिपाद्यविषयोऽस्ति आध्यामिकचर्चेति। स्वकृतकाव्यस्य विषयविन्यासावसरे कवेः वेदादिशास्त्रज्ञत्वात्मकानि दृष्टान्तान्यमवलोक्यन्ते। काव्यिकः सन्नपि आध्यात्मिकचर्चायै उपनिषद्ग्रन्थान् कीदृशम् अध्ययनं कृतवान् आसीत् इत्येतद्विषयस्य सम्यगोपास्थापनमस्ति एतच्छोधपत्रस्य उद्देश्यम्। उत्तररामचरिततः उपनिषदालोचितात्मिकाः उद्धृत्यः संगृह्य तासामुद्धृतीणां विश्लेषणे पूर्णप्रयाशः कृतोऽस्त्यत्र। अतः अस्मिन् लेखे विश्लेषणात्मकमध्ययनमनुसृतमिति स्पष्टम्। कवेः एकाधिकशास्त्रज्ञत्वस्य प्रकाशः अवलोक्यते उत्तररामचरितमिति नाटके, परन्तु विषयबाहुल्यात् एतेषां काव्येतरशास्त्राणां विचारः नैकशोधपत्रमपेक्षते। तेषु उपनिषदात्मकान् विषयान्नेव आधृत्य विस्तारितमिदं शोधपत्रम्। उत्तररामचरिते छान्दोग्यादि-चतसृणामुपनिषदामाध्यात्मिकविषयाः समाविष्टाः अनेनाध्ययनेन।

**कुटशब्दः** - *सीताशोकसन्तापम्, पञ्चवटी, ब्रह्मप्रापकानुकुलत्वम्, असूर्या, वैराजाः, कुशाग्रबुद्धिः।*

उत्तररामचरितमस्ति भवभूतेः श्रेष्ठनाटकम्। सप्ताङ्कविशिष्टेऽस्मिन् करुणरसात्मके नाटके भवभूतिना श्रीरामचन्द्रस्य उत्तर-जीवनवृत्तान्तं वर्णितमस्ति। तस्य विषयविन्यास-शैलीमवलोक्य विद्वज्जनाः महाकवि-कालिदास-प्रणीतेण

अभिज्ञानशाकुन्तलेन सह उत्तररामचरितं तोलयन्ति। अभिज्ञानशाकुन्तलस्य चतुर्थाङ्कः श्रेष्ठः[1] इति मान्यते विद्वत्समाजे, उत्तररामचरितस्य तु एकाङ्कपुर्वे तृतीयाङ्के एव श्रेष्ठत्वम् अवलोक्यते, एतन्नाटकस्य तृतीयोऽङ्कः एव श्रेष्ठरिति भावः[2]। तस्मादेव विद्वज्जनाणाम् एतादृशी युक्तिः प्राप्यते- **"उत्तरे रामचरिते भवभूतिर्विशिष्यते।"**[3] इति।

भवभूतेः उत्तररामचरितादिकृतिषु चरित्रचित्रणादि-काव्यसौन्दर्यम् एव दृश्यते इति चेन्न, एतदतिरिच्य आध्यात्मिकदृष्ट्या अपि तत्कृतानि दृश्यकाव्यानि समृद्धानि सन्ति। एतेषु भवभूतिकृतसर्वेषु दृश्यकाव्येषु संस्कृतसाहित्यस्य बहवः प्रसिद्धविषयाः निपुणतासहयोगेन समाविष्टाः सन्ति- यथा औपनिषद्विषयाः, वैदिकविषयाः, दार्शनिकविषयाः, श्रीमद्भगवद्गीतोक्तविषयाश्चेति। उपनिषदि ब्रह्माद्याध्यात्मिकविषयाः प्राध्यान्येन आलोच्यन्ते। भवभूतिः स्वरचितेषु नाटकेषु अपि उपनिषदुक्तान् विषयान् विस्तृतवान्। उत्तररामचरिते नाटके एतस्य आधिक्यता दृश्यते। श्रीरामचन्द्रस्य जीवनी-प्रसङ्गावतरणावसरे उपनिषदः प्रसङ्गः नैकवारं नयनपथि आगम्येत। अस्मिन् ग्रन्थे नाट्यकारः बहुज्ञत्वस्य परिचयं उपस्थापितवान्। नाट्यकारः स्वबुद्धिबलेन ईशावास्योपनिषदादीनाम् आध्यात्मिकविषयान् उत्तररामचरितनामके नाटके प्रसङ्गक्रमेण उपस्थाप्य एतद्बहुज्ञत्वस्य प्रमाणं प्रस्तुतवान्। नाट्यकारः नाटकस्य विषयवस्तूनि उपस्थापयन् उपनिषदुक्तविषयान् संयुज्य च अस्य दृश्यकाव्यस्य चमत्कारित्वमपि अवर्धयत्। सप्ताङ्कविशिष्टास्यास्य नाटकस्य पञ्चवटीप्रवेश-नामके द्वितीयाङ्के उपनिषदुक्तः प्रसङ्गः अधिकरूपेण वर्धितोऽस्ति। ईशोपनिषदः प्रसङ्गः, छान्दोग्योपनिषदः प्रसङ्गः, तैत्तिरीयोपनिषदः प्रसङ्गः च द्वितीयाङ्के उद्धृतः। अग्रे एते विषयाः विश्लेष्यन्ते।

उपनिषदुक्तविषयानाम् अभिव्यक्तौ उत्तररामचरितस्य द्वितीयाङ्कः प्रधानमस्ति। एतदङ्कस्य विस्कम्भके आत्रेयी-वासन्त्योः संवादेन अनेकानां घटनानां सूचना दीयते। आत्रेयी महर्षेः वाल्मीकेः आश्रमे निवसन्ती अध्ययनं करोति स्म, किन्तु तत्र अध्ययनसम्बन्धिविघ्नोत्पत्तेः कारणेन दण्डकवनम् आगता अस्ति। सा महर्षेः वाल्मीकेः समीपे केनचित् देवविशेषेण प्रदत्तयोः अद्भुतयोः बालकयोः विषये सूचनां ददाति, तौ कुशलवनामानौ स्तः। तौ च अतीव कुशाग्रबुद्धी स्तः, ताभ्यां सह अपरबालकानां स्वाध्यायायोग्यतां दर्शयति आत्रेयी। एवम्प्रकारेण परस्परवार्तालापेन दण्डकारण्यप्रवेशस्य किम्प्रयोजनम् इति पृच्छन्तीं वनदेवीं प्रति समाधत्ते आत्रेयी-

**"अस्मिन्नगस्त्यप्रमुखाः प्रदेशे भूयांस उद्गीथविदो वसन्ति।**
**तेभ्योऽधिगन्तुं निगमान्तविद्यां वाल्मीकिपार्श्वादिह पर्यटामि।।"**[4] इति।

दण्डकारण्ये अगस्त्यप्रभृतयः उद्गीथविदः ब्रह्मवेत्तारः वा निवसन्ति, तेभ्यः वेदान्तविद्याम् अधिगन्तुं वाल्मीकिसमीपात् एतत्दण्डकारण्यम् आत्रेयी भ्रमन्ती आगता अस्ति इति भावः। दार्शनिकदृष्ट्या श्लोकोऽयम् अत्यन्तं महत्वपूर्णम् अस्ति। श्लोकोक्तम् '**उद्गीथविदः**' इति पदम् एकाक्षरब्रह्मबोधकमस्ति। '**उद्गीथ**' इत्यस्य तात्पर्यम् अस्ति ओंकारः। उद्गीथं विदन्ति जानन्ति इति उद्गीथविदः।

अस्मिन् विषये नाट्यकारः भवभूतिः छान्दोग्योपनिषदः प्रेरणां गृहीतवान् इति भाति। **'उद्गीथ'** इति पदस्य उल्लेखः एकाधिकोपनिषत्सु प्राप्यते। छान्दोग्योपनिषदि उक्तम्- '**ओमित्येतदक्षरमुद्गीथमुपासीत**'[5] इति। अतः **'उद्गिथ'** इति पदेन छान्दोग्योपनिषदुक्तम् ओम्, एकक्षरं च बोध्यम्। अर्थात् उद्गिथः अविनाशी च समानार्थबोधकम्। तं जानन्ति ये ते **उद्गिथविदः** इति। मुण्डकोपनिषदि अपि ब्रह्मणः एतादृशी व्याख्या प्राप्यते- "**प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते**" इति।

अस्मिन्नङ्के केवलं छान्दोग्योपनिषदुक्तस्य **'ओमि'**त्येतस्य पदस्य व्याख्या नास्ति, अपि च तैत्तिरीयोपनिषदुक्तस्य आनन्दपदस्य माहात्म्यम्, तथा च मुण्डकोपनिषदुक्तस्य विषयस्य अपि व्याख्या प्राप्यते। अङ्केऽस्मिन् श्रीरामशम्बुकयोः कथोपकथनं वर्णितम् अस्ति। तयोः वार्तालापे एकाधिकोपनिषदः प्रस्फुटिताः। एतासाम् उपनिषदाम् आलोच्यविषयाः अत्र विश्लेष्यन्ते। अत्र **'यत्रे'**त्यादिना एकः श्लोकः नाट्यकारेण विरचितः। शुभसमाचारश्रवणेन प्रसन्नो भगवान्- **"उग्रस्य तपसः फलमनुभवे"** ति शम्बुकं प्रत्याह-

**"यत्रानन्दश्च मोदश्च यत्र पुण्यश्च सम्पदः।**

**वैराजा नाम ते लोकास्तैजसाः सन्तु ते शिवा।।"**[6] इति।

यत्र आनन्दाः मोदाः पुण्याः सम्पदश्च सन्ति ते खलु वैराजाः, नाम तैजसाः लोकाः इति। ते लोकाः शिवाः सन्तु इति आशीर्वचनं कथयति श्रीरामः इत्यस्ति श्लोकस्य भावः। अत्र '**आनन्दः**' इति पदमस्ति तात्पर्यपूर्णम्। ग्रन्थकारोक्त आनन्दपदस्यार्थः भवति आध्यात्मिकः सुखः- '**सुकृतिभिरात्मानुभवजन्यसुखानि**' इति। अत्र नाट्यकारेण उपनिषदुक्तः अर्थः प्रतिपादितः। तैत्तिरीयोपनिषदि एतद्विषये वर्णना प्राप्यते- "**आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ते। आनन्दं प्रयन्त्यभिसंविशन्तीति।**"[7] इति। अतः अत्र नाट्यकारेण उपनिषदः प्रेरणां गृहीतवान् इत्येतत् निश्चितम्।

श्लोकस्यास्य '**वैराजाः**' इति पदम् अस्ति अत्यन्तं तात्पर्यपूर्णम्। ब्रह्मन इमे इति वैराजाः। ब्रह्मसम्बन्धिनो लोकाः इत्यर्थः। एते लोकाः प्रशस्ततपःकर्तृणां कृते सुनिश्चिताः सन्ति। उत्तररामचरितस्य रमाटीकायां '**वैराजाः**' इति पदस्यार्थः ब्रह्मसम्बन्धिताः इति प्राप्यते- "**नित्यालोकमयाः मङ्गलकारिणी ब्रह्मसम्बन्धिताः**"[8] इति। अतः वैराजाः इति पदेन सत्यलोकं ब्रह्मलोकं वा अवधेयम् इति स्पष्टम्। अयं लोकः विविधोपनिषत्सु प्रतिपादितोऽस्ति। मुण्डकोपनिषदि एवमुक्तम्-

**"तपःश्रद्धे ये ह्युपव सन्त्यरण्ये शान्ता विद्वांसो भैक्ष्यचर्यां चरन्तः।**
**सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृतः स पुरूषो ह्यव्ययात्मा"।।**[9] इति।

श्लोकात्मके मन्त्रेऽस्मिन् विद्वांसोः सत्यलोकप्राप्तिविषयकवक्तव्यम् उपस्थापितम्। विरजसः नाम क्षीणपुण्यपापकर्माणः सत्यलोकम् आप्नुवन्ति। शंकराचार्यः अस्य मन्त्रस्य व्याख्यायां सत्यलोकमिति पदमुल्लेखितवान्- "**यस्मि*न्सत्यलोका*दावमृतः स पुरुषः प्रथमजो हिरण्यगर्भो ह्यव्ययात्माव्ययस्वभावो यावत्संसारस्थायी**"[10] इति।

केवलं विद्वज्जनाः ब्रह्मज्ञानिनः वा इमं ब्रह्मलोकं सत्यलोकम् आप्नुवन्ति। प्रसङ्गोऽयं छान्दोग्योपनिषदि एवम्प्रकारेण निर्देशितमस्ति-

**"यावत्क्षिप्येन्मनस्तावदादित्यं गच्छत्येतद्वै खलु लोकद्वारं विदुषां प्रपदनं निरोधो विदुषाम्"**[11] इति।

एतन्मन्त्रानुसारं मरणकाले परमात्मणः ध्यानस्थजनः मरणादनन्तरं बह्मद्वारं प्राप्नोति। अत्रापि ब्रह्मलोकस्य माहात्म्यमेव प्रस्फुटितम्। नाट्यकारोक्तः प्रसङ्गः अत्रापि वर्णितः।

बृहदारण्यकोपनिषदि अयं प्रसङ्गः अस्ति- "**तेन धीरा अपि यन्ति ब्रह्मविदः स्वर्गलोकमित ऊर्ध्वं विमुक्ताः**"[12] इति। एतस्याम् उपनिषदि अपि ब्रह्मलोकस्य माहात्म्यं यथावत् गीतमस्ति, यद्यपि '**स्वर्गलोकम्**' इति पदं देवलोकवाचकमस्ति, तथापि अत्र प्रकरणवशात् ब्रह्मलोकः बोध्यः।

एवं नाट्यकारोक्तेन अनेन प्रसङ्गेण विविधोपनिषदः स्मर्यन्ते। परन्तु एतासु उपनिषत्सु मुण्डकोपनिषत्कृता व्याख्या अधिक-प्रासङ्गिकं मन्यते। विषयविन्यासावसरे नाट्यकारः सत्यलोकस्य प्रसङ्गमवतरितवान् इत्येतदस्ति पाण्डित्यस्य परिचयः।

अस्मिन् द्वितीयाङ्के रामशम्बुकयोः सम्भाषणम् अतीव तात्पर्यपूर्णमस्ति। एतयोः वार्तालापेन नाट्यकारः उपनिषत्सम्बन्धिततत्त्वं प्रदर्शितवान्। यथा कथञ्चित् भगवान् श्रीरामः लोचनजलावरोधं विधाय शम्बुकमाह- "**भद्र, शिवास्ते पन्थानो देवयानाः। प्रलीयस्व पुण्येभ्यो लोकेभ्यः**"[13] इति। अर्थात् श्रीरामः सीतास्मरेणोद्गतानामश्रूणां निरोधपूर्वकं वदति यत् भद्र, तव देवयानाः नाम देवयाननामकाः पन्थानः कल्याणकराः सन्तु। त्वं पुण्यान् लोकान् गन्तुं विलीनो भव इति।

अत्र '**देवयानाः**' इति पदमस्ति उपनिषद्प्रतिपादितात्मकम्। पदमिदं प्रयोगाय नाट्यकारः छान्दोग्योपनिषदः प्रेरणां गृहीतवान् इति भाति। देवयानः अस्ति एकः मार्गविशेषः। छान्दोग्यपनिषदि गीतायां च एतयोः मार्गयोः उल्लेखः प्राप्यते। मरणादनन्तरम् आत्मा परलोकं गच्छति। अयं द्विविधमार्गः छान्दोग्योपनिषदि वर्णितोऽस्ति- देवयानमार्गः, पितृयानमार्गश्चेति। देवैः उपलक्षिततत्वात् देवमार्गः इति कथ्यते। ब्रह्मप्रापकानुकुलत्वात् अयं ब्रह्ममार्गः इति नाम्ना अपि अभिधीयते- "**एषः देवपथं, देवैरचिरादिभिर्गमयितृत्वेनाधिकृतैरूपलक्षितः पन्था देवपथ उच्यते ब्रह्म गन्तव्यं तेन चौपलक्षित इति ब्रह्मपथः**"[14] इति। अर्थात् एनां देवयानमार्गगतां मोक्षो भवति। आत्मज्ञानिनः देवयानमार्गैः ब्रह्मलोकम् आप्नुवन्ति, ततः कदापि न पुनरागच्छन्ति- "**एतेन प्रतिपद्यमाना गच्छन्तो ब्रह्मेमं मानवं मनुसम्बन्धिनं मनोः सृष्टिलक्षणमावर्तं नावर्तन्ते**"[15] इति। '**प्रलीयस्व**' इत्यनेन पदेनात्र

उपनिषदुक्तस्य **'एतेन प्रतिपद्यमाना'** इत्यादि-मंत्रांशस्य एव प्रतिविम्बम् अत्र प्रतिपादितम् इति भाति। **'लोकेभ्य'** इत्येतत् पदं ब्रह्मबोधकमित्यत्र नास्ति संशयः।

श्रीरामोक्तं **'शिवास्ते'** इत्येतत् वाक्यं छान्दोग्योपनिषदः प्रेरणात्मकमस्ति इत्येतत् स्पष्टम्। अस्य विषयस्य दृढीकरणार्थं नाट्यकारः पुणः शम्बुकोक्तिम् अवतारयति। महर्षिमगस्त्यं प्रणमितुं निर्गतात् प्राक् रामोक्त्याः प्रत्युत्तरे शम्बुकः आह- "**यावत्पुराणब्रह्मर्षिमगस्त्यमभिवाद्य शाश्वतं पदमनुप्रविशामि**"[16] इति। **'शाश्वतं पदम्'** इति एतत् ब्रह्मलोकबोधकम् अस्ति। शाश्वतं नाम अनश्वरम्, पदमित्युक्ते स्थानमिति। देवयानमार्गेन गमनेन पुण्यात्मानः ब्रह्मलोकम् आप्नुवन्ति। तत्र ते मुक्तावस्थां प्राप्य तिष्ठन्ति, पुनः नश्वरे जगति न प्रत्यागच्छन्ति।

द्वितीयाङ्कादनन्तरं नाटकस्य चतुर्थाङ्के उपनिषदुक्तः विषयः प्राविष्टः। नाटकस्यास्य चतुर्थाङ्के दृश्यते यत् द्वौ तपस्वीबालकौ वाल्मीक्याश्रमम् आगच्छतः। वशिष्ठः अरुन्धती च श्रीरामस्य मातृभिः सह पूर्वम् एव अत्र आगतवन्तौ। अस्मिन्नेव समये जनकस्यापि आगमनं दृश्यते। जनकः प्रविश्य सीताशोकसन्तापम् अभिनयन् '**कष्टम्**' इत्यादिना स्वविचारं प्रकटयति। अत्र नाट्यकारः जनकेन उपनिषद्सम्बन्धितं वाक्यं वाचयति- "**अन्धतामिश्रा ह्यसूर्या नाम ते लोकास्तेभ्यः प्रतिविधीयन्ते य आत्मघातिन इत्येवमृषयो मन्यन्ते**"।[17] इति। अर्थात् ये जनाः आत्मानं हन्ति ते सूर्यरहीतलोकम् अन्धकारमयलोकं वा आप्नुवन्ति इति ऋषयः मन्यन्ते। जनकस्य अस्याम् उक्त्याम् ईशावास्योपनिषदः स्पर्शः प्राप्यते। ईशोपनिषदि उक्तम्-

**"असूर्या नाम ते लोका अन्धेन तमसावृता।**
**तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः।।"**[18] इति।

असूर्यसम्बन्धी लोकः अज्ञानात्मकेन तमसा आवृतः स्यात्। ये अज्ञानजनाः स्वयमात्मानं हन्ति, ते निश्चयेन एतादृशं तमसावृतं लोकं प्रति गच्छन्ति। अत्र नाट्यकारः ईशावास्योपनिषदः उक्तिमेव स्वभाषया उपस्थापितवान्। अतः भवभूतिः ईशावास्योपनिषदः प्रेरणां संगृह्य अत्र जनकस्य व्याथां वर्णयति इत्येतत् वक्तुं शक्यते। अनया उद्धृतिना तस्य ईशावास्योपनिषज्ज्ञानमपि स्पष्टं स्यात्।

अतः उत्तररामचरितम् इत्स्मिन् नाटके भवभूति-प्रयुक्ताः उपनिषदाधारितविषयाः नाट्यकारस्य काव्येतरशास्त्रज्ञत्वं प्रतिपादयन्ति इत्यस्मिन् नास्ति कश्चित् संशयः। तस्य उपनिषदात्मकं ज्ञानं वास्तवेनैव गभीरमासीत्। सः शास्त्राणाम् अनुसरणम् एतादृशं कृतवान् यथा अनुचरी स्वस्य स्वामिनं सदा अनुसरति। अस्मिन् शोधपत्रे स्पष्टं दृश्यते यत् सः न केवलं साहित्यकारः, अपि तु महान् दार्शनिकः चिन्तकः च आसीत्। उत्तररामचरितम् एतादृशं नाटकमस्ति यत्र काव्यसौन्दर्येन सह उपनिषदाधारितस्य दार्शनिकतत्वस्य अपि उल्लेखः निपुणतया कृतोऽस्ति। न केवलम् उपनिषदालोचनायाम्, अपि च तद्व्यतिरिक्त-दार्शनिकप्रयोगे अपि कविः निपुणः अस्ति। तत्कृतेऽस्मिन् उत्तररामचरिते एव भारतीयदर्शनस्य बहवः शास्त्रीय-प्रयोगाः अभिव्यक्ताः सन्ति। यथा- अर्थवादः, विपर्ययज्ञानं, स्मृतिज्ञानम्, अन्तःकरणवृत्तिश्चेति। एतासां तत्त्व-पर्यालोचनायां पण्डिताः अवश्यमेव आश्चार्यान्विताः भविष्यन्ति। कवेः कृतिषु सूक्ष्मतया अभिव्यक्तानि एतादृश-तत्त्वानि वहिःप्रकाशम् अपेक्षते। तेन काव्यशैलीगुम्फनावसरे विविधोपनिषदां गुढतत्त्वं समाविष्टमस्ति। नैतादृशं गूढतत्त्वप्रतिपादनं सर्वैः सम्भवति। प्रसङ्गानुसारं ग्रन्थकारेण उपनिषदुक्ताः विषयाः उपस्थापिताः। अतः भवभूतिविषये "**व्याकरणन्यायमीमांसापरिज्ञाता**"[19] इति उक्तिः यथार्थमेवास्ति।

## सन्दर्भतथ्यसूत्राणि

---

[1] "काव्येषु नाटकं रम्यं तत्रापि च शकुन्तला।
तत्राप्यङ्कस्तुरीयस्तु तत्र श्लोकचतुष्टयम्।।"
-डॉ. श्रीकृष्णमणि-त्रिपाठी-प्रणीतम् अभिज्ञानशाकुन्तलम्, भुमिका, पृष्ठांकः-28

[2] "अभिज्ञान शाकुन्तल का तो चतुर्थ अंक ही प्रसिद्ध हुआ, परन्तु लगता है कवि ने उसे चुनौती देकर उससे एक सीढ़ी पहले ही, तीसरे अङ्क में ही, अपूर्व यश-लाभ कर लिया है।"
-शुक्ल-प्रतिपादितमुत्तररामचरितम्, पृष्ठांकः-275

[3] तारिणीश झा, उत्तररामचरितम् पृष्ठांकः-25

[4] उत्तररामचरितम्-2/3

[5] छान्दोग्योपनिषद्-1.1.1

[6] उत्तररामचरितम्-2/12

[7] तैत्तिरियोपनिष्, तृतीयवल्ली

[8] उत्तररामचरितम्, रमाटीका

[9] मुण्डकोपनिषद्-1.2.11

[10] मुण्डकोपनिषद-1.2.11 शांकरभाष्यम्

[11] छान्दोग्यपनिषद्-8.6.5

[12] बृहदारण्यकोपनिषद्-4.4.8

[13] उत्तररामचरितम्-द्वितीयाङ्कः

[14] छान्दोग्योपनिषद्-4.15.5 शांकरभाष्यम्

[15] छान्दोग्यपनिषद्

[16] उत्तररामचरितम्-द्वितीयाङ्कः

[17] उत्तररामचरितम्-चतुर्थाङ्कः

[18] ईशोपनिषद्-3

[19] डॉ. कृष्णकान्त त्रिपाठी-प्रणीतम् उत्तररामचरितम्- पृष्ठांकः 5

## सन्दर्भग्रन्थसूची :

1. बेलवल्कर, श्रीपाद कृष्ण. (1971). उत्तररामचरितम् (Part 1). केम्ब्रिजः हारवर्ड विश्वविद्यालय प्रेस. (Original work published 1915)
2. बृहदारण्यकोपनिषद् (सानुवाद शाङ्करभाष्यसहित). (2001). नवाँ संस्करण. गोरखपुरः गीता प्रेस.
3. छान्दोग्योपनिषद्. (1917). लखनऊः मंशी नवल किशोर C.I.E. प्रेस.
4. जालान, घनश्यामदास. (2013). छान्दोग्योपनिषद् (तृतीय संस्करण). गोरखपुरः गीता प्रेस.
5. झा, तारणिश. (1875). उत्तररामचरितम् (चतुर्थ संस्करण). इलाहाबादः रामनारायणलाल बेणीप्रसाद.
6. जयकृष्ण. (1998, June 2). उत्तररामचरित नाम नाटकम्. नागपुरः न्यायसुधा मुद्रणालय.
7. काने, पी. वी. (1962). उत्तररामचरितम्. दिल्लीः मोतीलाल बनारसीदास.
8. माथुर, डॉ. प्रेरणा. (2011). उत्तररामचरितम्. दिल्लीः विशाल प्रकाशन.
9. मुण्डकोपनिषद् (सानुवाद शाङ्करभाष्यसहित). (1992). प्रथम संस्करण. गोरखपुरः गीता प्रेस.
10. शास्त्री, पंडित भट्टजी. (1895). उत्तररामचरितम्. नागपुरः न्यायसुधा मुद्रणालय.
11. सिंह, डॉ. सुदामा. (1997). बृहदारण्यकोपनिषद्. श्रीमहालक्ष्मीनारायण यज्ञसमिति.
12. सरस्वती, स्वामी दयानन्द. (2013). ब्रह्मसूत्रशाङ्करभाष्यम्. दिल्लीः चौखम्बा संस्कृत प्रतिष्ठान